लोहित्यः परिमाणमस्य, पञ्च कलापाः परिमाणमस्य इति विगृह्य 'तदस्य परिमाणम्' (५. १. ५७/१७२३) इति योगविभागात् प्रत्ययः, तद्धितान्तश्चायं समुदायः सञ्ज्ञा। द्वाभ्यां शाणाभ्यां क्रीतम् द्वैशाणम्। त्रैशाणम्। 'शाणाद् वा' (५. १. ३५/१७००), 'द्वित्रिपूर्वादण् च' (५. १. ३६/१७०१) इत्यण् प्रत्ययः। 'असञ्ज्ञाशाण-कुलिजानाम्' इति केचित् पठन्ति। द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः ॥

## जे प्रोष्ठपदानाम्। (१८/१४०९)

ज इति जातार्थो [1]निर्दिश्यते। तत्र यः तद्धितो विहितः तस्मिन्[2] ञिति, णिति, किति च परतः प्रोष्ठपदा-नामुत्तरस्याचामादेः अचः वृद्धिर्भवति। प्रोष्ठपदा नाम नक्षत्रम्, [3]ताभिः युक्तः कालः (४. २. ३/१२०४) इत्यण्। तस्य 'लुबविशेषे' (४. २.४/१२०५) इति लुप्। प्रोष्ठपदासु जातः, ऋतुनक्षत्रेभ्योऽण् (४. ३. १६/१३८७) इत्यण्, प्रोष्ठपादः माणवकः। जे इति किम्? यदा प्रोष्ठपदो मेघो धरणीमभिवर्षति, प्रोष्ठपदासु भवः प्रौष्ठपदः। प्रोष्ठपदानाम् इति बहुवचननिर्देशात् पर्यायोऽपि गृह्यते भद्रपादः [4]इति ॥

## हृद्भगसिन्ध्वन्ते पूर्वपदस्य च। (१९/११३३)

हृद् भग सिन्धु इत्येवमन्तेऽङ्गे पूर्वपदस्य उत्तरपदस्य च अचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति [5]च परतः। सुहृदयस्य इदम् सौहार्दम्। सुहृदयस्य भावः सौहार्द्यम्। सुभगस्य भावः सौभाग्यम्। [6]दौर्भाग्यम्। सुभगायाः अपत्यम् सौभागिनेयः। दौर्भागिनेयः। कल्याण्यादिषु (५. १. १२६/११३१) सुभगदुर्भगेति पठ्यते। सुभग मन्त्रे इत्युद्गात्रादिषु (५.१.१२९/१७९४) पठ्यते। तत्रोत्तरपदवृद्धिर्नेष्यते। महते सौभगाय। छन्दसि [7]सर्वविधीनां विकल्पितत्वात् (पु. प. ३५)। सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, सक्तुसिन्धुषु भवः साक्तु-सैन्धवः। पानसैन्धवः। सिन्धुशब्दः कच्छादिषु (४. २. १३३/१३५७) पठ्यते, तेन तदन्तविधि[8]रिष्यते इति अण्प्रत्ययः ॥

## अनुशतिकादीनां च। (२०/१४३८)

अनुशतिक इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। अनुशतिकस्य इदम् आनुशातिकम्। अनुहोडेन चरति आनुहौडिकः। [9]अनुसंवरणे दीयते आनुसांवरणम्। [10]अनुसंवत्सरे दीयते आनुसांवत्सरिकः। अङ्गारवेणुः नाम कश्चित्, तस्य अपत्यम् आङ्गारवैणवः। असिहत्य–तत्र भवम् आसिहात्यम्। [अस्यहत्य इति केचित् पठन्ति, ततोऽपि विमुक्तादित्वादण् (५. २. ६१/१८६१)। अस्यहत्यशब्दोऽस्मिन्नध्यायेऽस्ति आस्यहात्यः। अस्यहेतिः [11]इत्येवमपरे पठन्ति। अस्यहेतिः प्रयोजनमस्य आस्य-हैतिकः। अत एव वचनादस्य समुदायस्य प्रातिपदिकत्वं विभक्तेश्चालुक्। वध्योग इति बिदादिः (४.१.१०४/११०६) अयम्, तस्यापत्यम् वाध्यौगः। पुष्करसद्, अनुहरत् इति [12]बाह्वादिषु (४.१.९६/१०९६) पठ्यते।

---

1. निर्देशः क. 2. तद्धिते इत्यधिकम् क. 3. नक्षत्रयुक्तकाले क. 4. इति सिध्यति क. 5. च नास्ति ब. क. ड, प्रत्यये इत्यधिकम् इ. हृ. 6. दौर्भाग्यम् नास्ति क. 7. सर्वे विधयः विकल्प्यन्ते क. 8. अत्र भवति क. 9. अनुसंवरणे दीयते नास्ति क. 10. अनुसंवत्सरे भवः क. 11. एवम् नास्ति इ. हृ. 12. एतौ शब्दौ इत्यधिकम् क, शब्दौ इत्यधिकम् इ.